# Aksharabrahma Stotram

# अक्षरब्रह्मस्तोत्रम्

## Document Information

Text title : Aksharabrahma Stotram

File name : akSharabrahmastotram.itx

Category : deities_misc, svAminArAyaNa, gurudev, stotra

Location : doc_deities_misc

Author : achintyAnandabrahmachArI

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# अक्षरब्रह्मस्तोत्रम्

(शिखरिणी वृत्तम्)
यद्रोमविवरे लीना अण्डानां कोट्यः पृथक् ।
तदक्षरं गुणातीतं गुणातीतं नमाम्यहम् ॥ १॥

महाध्यानाभ्यासं विदधतमजस्रं भगवतः
पवित्रे संप्राप्तं स्थितिमतिवरे-कान्तिकवृषे ।
सदानन्दं सारं परमहरिवार्ता-व्यसनिनं
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ २॥

परं मायोपाधेर्विशदहृदये स्वे प्रतिदिनं
निजात्मानं शान्तस्फुरदुरु-महोमण्डलवृतम् ।
प्रपश्यन्तं शुद्धाक्षर-मतितरानन्द-निलयं
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ ३॥

शुभाविर्भावानां स्वहृदि सहजानन्दमनिशं
निदानं पश्यन्तं प्रकृतिपुरुषादे-रधिपतिम् ।
हरिं तैलासार-प्रतिनिभमथाग्रे निज दृशोर्
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ ४॥

हरिर्यस्योदार-प्रणयरशना-बद्धचरणो
यतो नैति प्रेष्ठात् क्वचिदपि पृथग्भावमजितः ।
यथा शब्दादर्थो निजविमलचित्तादपि वियत्
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ ५॥

स्थितो मातुर्गर्भे हरिमविरतं योऽक्षरपरं
चिदानन्दाकारं ललितवसनालङ्कृतिधरम् ।
अपश्यत्पुण्याक्षं विधुमिव चकोरः शुचिरुचिं
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ ६॥

अनाकृष्टात्मा यो भुवनविषयै-रप्यतिवरै-
रलिप्तत्वेनास्थादिह मतिमुषस्तानधिगतः ।
यथा वायुश्चाभ्रं वडवदहने वाब्धिनिलयो
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ ७॥

जनौघेष्वेकान्तं वृषमखिल-दोषार्तिशमनं
सुभद्रं सच्छास्त्रप्रतिभणित-निर्वाणसरणीम् ।
ततानात्मप्रेष्ठं पुरुकरुणया मोहदलनं
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ ८॥

स्फुरत्स्फारज्ञानामृत-विपुलवृष्ट्याति-सुखदो
दुरापैर्युक्तो यः श्रुतिनिगदितैः सद्गुणगणैः ।
विधुं निन्ये लज्जां जनविविध-तापोपशमने
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ ९॥

जनाज्ञानध्वान्त-क्षपणकरणात् तीक्ष्णकिरणं
ह्रियं निन्ये स्वेक्षा-दुरितदलनो यो मृदुमनाः ।
महैश्वर्यैर्युक्तो हरिपर-तरानुग्रहतया
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ १०॥

प्रसङ्गं यस्यैत्याजगति ननु जाता जनगणा
बृहद्रूपा भूपा हरिपुरुतरध्यान-निरताः ।
विरक्ता राज्यादौ शुभगुणयुताश्चातिसुखिनो
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ ११॥

यदुक्तां सद्वार्तां भवभयहरां श्रोतुमनिशं
समायन् सद्वाता बहुजनपदेभ्यो हरिजनाः ।
मराला भूयांसः समुदमिव सन्मानस-सरो
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ १२॥

यदावासे मार-प्रणयरस-लोभादिरिपवः
प्रवेष्टुं नो शेकुर्विजितविधिमुख्या बहुमदाः ।
मुनीन्द्रैस्तं मान्यं शुभसकल-तीर्थास्पदपदं
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ १३॥

महाश्रद्धोपेतं मुनिगुरुवरं स्वक्षरतनुं
हरेर्भक्त्यादौ द्राग्भवभयभिदं स्वेक्षणकृताम् ।

प्रशान्तं साधुत्वा-वधिमतुलकारुण्य-निलयं
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ १४॥

मुहुर्यस्मै प्रादात् पुरुमुदमितो यद्वरगुणैर्
हरिर्हारान् पौष्पान्निजतनुधृतानङ्गदमुखान् ।
स्वभुक्तं सद्भोज्यं वरवसनमुख्यं स्वविधृतं
गुणातीतानन्दं मुनिवरमहं नौमि सततम् ॥ १५॥

अनेकेभ्यः सद्भ्यो विमल-हरिविज्ञानददतं
भुवि ब्राह्मीं विद्यां हरिवचनरूपामुदयतम् ।
हरिध्यानासक्तं शुभगुणमनाद्यक्षरमहं
गुणातीतानन्दं सकलगुरुमीडे मुनिवरम् ॥ १६॥

इति श्री अचिन्त्यानन्दब्रह्मचारीविरचितं अक्षरब्रह्मस्तोत्रं सम्पूर्णम् ।

---

*Aksharabrahma Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*